[1]येऽत्राकर्मकास्तेषाम् 'अणावकर्मकाच्चित्तवत्कर्तृकात्' (१.३.८८/२७५४) इत्येवं सिद्धे[2] वचनमिदम[3]चित्तवत्कर्तृकार्थम्। [4]बोधयति पद्मम्। [5]योधयन्ति काष्ठानि। नाशयति दुःखम्। जनयति सुखम्।

[6]येऽत्र चलनार्था अपि [7]तेषां 'निगरणचलनार्थेभ्यश्च' (१.३.८७/२७५३) इति सिद्धे यदा [8]न चलनार्था-स्तदर्थं [9]वचनम्। [10]प्रवते। [11]प्राप्नोति इति गम्यते। अयो [12]द्रवति। विलीयते इत्यर्थः। कुण्डिका [13]स्रवति। [14]स्यन्दते इत्यर्थः। तद्विषयाण्युदाहरणानि [–प्रावयति। द्रावयति। स्रावयति]॥

## निगरणचलनार्थेभ्यश्च। (८७/२७५३)

णेः इति वर्तते। [15]कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते। निगरणम् अभ्यवहारः। चलनं कम्पनम्। [16]निगरणार्थेभ्यश्चलनार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। निगारयति। आशयति। भोजयति। चलनार्थेभ्यः––चलयति। चोपयति। कम्पयति। अयमपि योगः सकर्मकार्थः, [17]अचित्तवत्कर्तृकार्थश्च।

[५३] अदेः प्रतिषेधो वक्तव्यः।

अत्ति देवदत्तः, आदयते देवदत्तेन॥

## अणावकर्मकाच्चित्तवत्कर्तृकात्। (८८/२७५४)

णेः इति वर्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामा[18]त्मनेपदापवादः परस्मैपदं विधीयते। अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च तस्माद् ण्यन्तात् परस्मैपदं भवति। आस्ते देवदत्तः, आसयति देवदत्तम्। [19]शेते देवदत्तः, शाययति देवदत्तम्। अणौ इति किम्? चेतयमानं प्रयोजयति [20]चेतयते, इति केचित् प्रत्युदाहरन्ति तदयुक्तम्। हेतुमण्णिचो विधिः। प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव न्याय्यः। तस्मादिह चेतयति इति परस्मैपदेनैव[21] भवितव्यम्। इदं तु प्रत्युदाहरणम्––आरोहयमाणं प्रयुङ्क्ते आरोहयते[22]। अकर्मकात् इति किम्? कटं कुर्वाणं [23]प्रयुङ्क्ते [24]कारयते। चित्तवत्कर्तृकात् इति किम्? शुष्यन्ति व्रीहयः, [25]शोषयते व्रीहीनातपः॥

## न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। (८९/२७५५)

पूर्वेण [26]योगद्वयेन कर्त्रभिप्रायक्रियाफलविवक्षायामा[27]त्मनेपदापवादः परस्मैपदं विहितम्। तस्य प्रतिषेधोऽयमुच्यते। यत् कर्त्रभिप्राय[28]विषयमात्मनेपदं [29]तदवस्थितमेव, [30]न प्रतिषिध्यते। पा दमि आङ्यम आङ्यस

1. ये चात्र पुनरकर्मकाः फ. 2. परस्मैपदे इत्यधिकम् क. 3. अचित्तवदर्थम् फ. 4. बोधयति ग्रन्थम् ब, उदाहरणमिदं नास्ति ह. 5. योधयति काष्ठम् फ. 6. प्रु द्रु स्रु इत्यादयः इत्यधिकम् फ. 7. तेभ्यः अ, तेषामपि ह. 8. अचलनार्थाः अ.ब.फ. 9. ग्रहणं फ, भवति इत्यधिकम् ब. 10. प्रवते नास्ति ब, प्रावयति क.फ.ह.ड, पवति ई. 11. प्राप्यते ई. 12. द्रावयति क.फ.ह. 13. स्रावयति क.ड.फ. 14. स्यन्दति ब. 15. कर्त्रभिप्राये क्रियाफले आत्मनेपदे प्राप्ते फ. 16. निगरणार्थे चलनार्थे च फ. 17. अचित्तकर्तृकार्थश्च ब. 18. आत्मनेपदे प्राप्ते क. 19. उदाहरणमिदं नास्ति ह. 20. चेतय इति ह. 21. एव नास्ति ह. 22. इति इत्यधिकम् क. फ. 23. प्रयोजयति अ. 24. कटं कारयते अ. 25. शोषयति क. फ. 26. निगरणचलनार्थेभ्यश्च, अणावकर्मकात् इत्यनेन इत्यधिकम् अ.क. 27. आत्मनेपदे प्राप्ते तदपवादः फ. 28. °क्रियाफलमात्मनेपदं फ, °विषयं परस्मैपदं अ.क.ड. 29. तदनेन अ. 30. न नास्ति ह.